श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीजग्गुरु सिङ्गरय्यङ्गरविरचितं

# ॥ श्री लक्ष्मीवेङ्कटेश्वरभुजङ्गस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीवेङ्कटेश्वरभुजङ्गस्तोत्रम् ॥

भुजङ्गाचलाग्रस्थहेमालयान्तः -
    स्फुरन्नीलरत्नत्विषा विग्रहेण।
मुहुर्भासयन्तं सुखान्तं महान्तं
    भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 1 ॥

स्फुरद्रत्नभास्वत्किरीटाभिरामं
    ललाटस्थकर्पूरचूर्णोर्ध्वपुण्ड्रम्।
मनाङ्मन्दहासाधरोष्ठास्यपद्मं
    भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 2 ॥

कृपापूर्णसौम्येक्षणाब्जावलोकैः
    नतानेकभूतौघरक्षैकदीक्षम्।
मणिस्तोमकान्तिच्छटाकर्णपूरं
    भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 3 ॥

कराग्रोल्लसच्छङ्खचक्रायुधाढ्यं
    रमावासरम्यायतोरोप्रदेशम्।
लसत्पीतवासःप्रभारञ्जिताङ्गं
    भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ 4 ॥

अनर्घस्फुरद्रत्नभूषाविशेषैः
    अनेकैस्सदालङ्कृतं मङ्गलाङ्गम्।

सुगन्धिप्रसूनावलिस्रक्सुरम्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम्॥ 5॥

पदाब्जं श्रयध्वं ममेत्यादरेण
ब्रुवाणं स्वभक्तान् करन्यासभङ्ग्या।
जगज्जन्मरक्षाक्षयादिस्वलीलम्
भजे वेङ्कटेशं श्रये श्रीनिवासम्॥ 6॥

भवाब्धिर्भवेज्जानुदघ्नं श्रितानाम्
इति व्याहरन्तं करेणापरेण।
धृतार्चावतारं परं ब्रह्म नित्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम्॥ 7॥

पदाब्जाश्रितानेकदेवाधिपानां
किरीटस्थरत्नप्रभाभासिताङ्घ्रिम्।
त्रिलोकैकनाथं त्रयीमौलिवेद्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम्॥ 8॥

धनं भक्तलोकैरनेकैर्गृहीत्वा
तदीयां समस्तां विपत्तिं निवार्य।
अभीष्टानि दत्त्वा समस्तानवन्तं
भजे वेङ्कटेशं श्रये श्रीनिवासम्॥ 9॥

नमः श्रीनिवासाय सर्वान्तरात्मन्
नमस्तेऽस्तु पद्मावतीवल्लभाय।
नमो वेङ्कटाद्रिस्फुरत्कालमेघ
प्रपन्नार्तबन्धो नमस्तेऽस्तु नित्यम्॥ 10॥

॥ इति श्री लक्ष्मीवेङ्कटेश्वरभुजङ्गस्तोत्रं समाप्तम्॥